भूमा, [न्] पुं, बहुत्वम् । यथा । "भूयोभूमभूयिष्ठाः ।" बहोरीयसिमन् इष्ठान्तस्य एते निपात्यन्ते । इति मुग्धबोधव्याकरणम् । ईयसोर्येसु ईयस्वादौ बहोर्भूरादेशः । ईयस्विन्नोरादिलोपः । इष्ठे यकारागमश्च निपात्यन्ते । अतिशयेन बहुः भूयान् । बहोर्भावः भूमा । अतिशयेन बहुः भूयिष्ठः । इति तट्टीकायां दुर्गादासः ॥ बहुत्वविशिष्टः । तत्र वाच्यलिङ्गः । यथा । भूयः भूम । इति प्रभूतशब्दपर्य्याये अमरटीकायां रमानाथः ॥*॥ विराट्पुरुषः । यथा । "यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम् ।" इत्यादि श्रुतिभ्यो ब्रह्मनित्यत्वं सत्वगुणस्य प्रतिभाति । इति वेदान्तसारटीका ॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति । भू + "भुवः कित् ।" उणा० ४ । ४५ । इति मिः । स च कित् ।) पृथिवी । स्थानमात्रम् । इति मेदिनी । मे, २२ ॥ (यथास्याः पर्य्यायः ।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः ।
क्षितिरुर्व्वी मही क्षोणी क्ष्मा धरा कुर्व्वसुन्धरा ॥"
इति वैद्यकरत्नमालायाम् ।)
जिह्वा । इति संक्षिप्तसारोणादिवृत्तिः ॥ योगिनामवस्थाविशेषः । यथा,—
"निरुद्धे चेतसि पुरा सविकल्पसमाधिना ।
निर्व्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥
व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः ।
अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः ॥
एवं प्रागभूमिसिद्धावप्युत्तरोत्तरभूमये ।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति ॥"
इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती ॥
भूमेः पर्य्यायादयः पृथिवीशब्दे द्रष्टव्याः । अस्या गुणाः ।
"भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता ।
गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः ॥"
इति महाभारते मोक्षधर्म्मः ॥
अस्यार्थः । स्थैर्य्यमचाञ्चल्यम् १ । गुरुत्वं पतनप्रतियोगी गुणः २ । काठिन्यम् ३ । प्रसवार्थता धान्याद्युत्पत्तिस्तदर्थता ४ । गन्धः ५ । गुरुत्वं पिण्डपुष्टिः ६ । शक्तिः गन्धग्रहणसामर्थ्यम् ७ । संघातः श्लिष्टावयवत्वम् ८ । स्थापना मनुष्याद्याश्रयम् ९ । धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः । इति तट्टीका ॥*॥
भूमिदानमाहात्म्यम् यथा,—
"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम् ।
यो ददाति महीं राजन् ! विप्रायाकिञ्चनाय वै ॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः ।
न भूमिदानसदृशं पवित्रमिह विद्यते ॥
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति ।
उभौ तौ पुण्यमापन्नौ नियतं स्वर्गगामिनौ ॥
यत्किञ्चिद्भूमिदानन्तु सर्व्वदानोत्तमोत्तमम् ।
महीपते ! नरः कोऽपि भूमिदो भूमिमाप्नुयात् ॥
भूमिदानसमं दानं नास्त्यत्र पृथिवीतले ।
तस्मादल्पमलञ्चैव भुक्तिमुक्तिसुखप्रदम् ॥
यथा तथा प्रकारेण भूमिदाता तु भूमिपः ।
सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात् ॥
इहदल्पतरं वापि भूमिदानं महत्तमम् ।
यः कश्चिद्ब्राह्मणो दत्त्वा भवतीह महीपतिः ॥
सर्व्वथा सर्व्वदा देया धरित्री ब्राह्मणस्य तु ।
प्राणान्तेनैव न क्वापि हरणीया जनैरपि ॥
कृत्वा खातादिकं कर्म्म विप्रभूमिं नरो बलात् ।
करोति यदि राजेन्द्र ! तत् सर्व्वं निष्फलं भवेत् ॥
ब्राह्मणाद्दानग्रहणं विनानुज्ञाञ्च पार्थिव ! ।
तथा तत्परितोषञ्च तत्तन्मूल्यादिकं विना ॥
विप्रभूमौ भूसुरोऽपि दैवं पैत्रं तथाध्वरम् ।
हरिसद्म तथारामप्रासादमण्डपं गृहम् ॥
खातादिखननं सेतुबन्धनं भवनं गवाम् ।
सधान्यफलमूलादिशाकादिक्षेत्रमेव च ॥
पञ्चाम्रवपनं पुष्पोद्यानं इक्ष्वादिरोपणम् ।
सवटाश्वत्थतुलसीधात्रीविल्वादिरोपणम् ॥
नित्यं नैमित्तिकं काम्यं स्नानसन्ध्यादिकं तथा ।
पञ्चयज्ञं तथेष्टार्थादिकमेतत्तु चापरम् ॥
श्रीकृष्णसेवनं भक्तभक्तिषोडशपूर्व्वकम् ।
का कथा वेतरेषान्तु न कुर्य्यात् पारमार्थिकः ॥
यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च ।
कुरुते मत्ततामोहादज्ञानाद्वा भ्रमादितः ।
नृपते ! कुर्व्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम् ॥
यद्भूमिरथवा तस्य संपूर्णं फलमेव च ।
अतो लोके हि धर्म्मात्मा ज्ञानी च सर्व्वधर्म्मवित् ॥
विवेकी धर्म्मशास्त्रज्ञः पुराणागमवेदवित् ।
वेदान्तज्ञो सुनिः साधुः कार्य्यादिषां महीपते ! ।
न कुर्य्याद्भूमिहरणं ब्राह्मणीहरकञ्चनम् ।"
इति पाद्मोत्तरखण्डे ४९ अध्यायः ॥*॥
अपि च । बृहस्पतिः ।
"षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
उच्छेत्ता चानुमन्ता च तावन्ति नरके वसेत् ॥
तथा ।
भूमिं दत्त्वा तु यः पत्रं कुर्य्याच्चन्द्रार्ककालिकम् ।
अनाच्छेद्यमनाहार्य्यं दानच्छेदस्तु तद्विदुः ॥
महाभारते ।
अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनीं जननीं यथा ॥
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् ।
दाने वाप्यथवादाने नामास्याः परमं प्रियम् ॥"
दानादानकाले यत् प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दातव्या प्रतिग्रहीतव्या च । भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम् । भूमिर्विष्णुदैवताका । षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम् । प्रतिग्रहे तद्भूमेः प्रदक्षिणमात्रम् । भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम् । इति शुद्धितत्त्वम् ॥*॥ आर्द्राद्यपादगे रवौ भूमौ रजोयुक्ता भवति तत्काले पाठादिनिषेधो यथा ज्योतिषे ।
"रजोयुक् स्यादम्बुवाची च रौद्राद्यपादगे रवौ ।
तस्यां पाठो बीजवापो नाहिभीर्दुग्धपानतः ॥
रजोयुक् क्ष्मा ऋतुमती पृथ्वी । ज्योतिषे ।
यस्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत् ।
अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः ॥"
मत्स्यसूक्ते ।
"धरण्यामृतुमत्याञ्च भूमिकम्पे तथैव च ।
अन्तरागमने चैव विद्यां नैव पठेद्बुधः ॥"
इति तिथ्यादितत्त्वम् ॥*॥
"न स्वाध्यायं वषट्कारं न देवपितृपूजनम् ।
हलानां योजनञ्चैव बीजानां वपनं तथा ।
दिनत्रयं न कुर्व्वीत यावत् पृथ्वी रजस्वला ॥
यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा ।
अम्बुवाचीदिनेनैव पाकं कृत्वा न भक्षयेत् ॥
स्वपाकं परपाकं वा अम्बुवाचीदिने तथा ।
भक्षणं नैव कुर्व्वीत चाण्डालान्नसमं स्मृतम् ॥"
इति राजमार्त्तण्डः ॥
अशुद्धां भूमिमाह देवलः ।
'सा अमेध्या मलिना दुष्टा एतत्त्रितयान्वितमा
भवति ।' अत्रामेध्या यथा,—
"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः ।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः ॥
विण्मूत्रोपहतं यत्तु कुणपो यत्र दृश्यते ।
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते ॥"
कुणपः शवः । दुष्टा यथा,—
"कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी ।
द्रव्यापकर्षणैः क्षिप्तैर्वान्तैश्च दुष्टतां व्रजेत् ॥"
वान्ता वमीभूतश्लेष्मा । मलिना यथा,—
"नखदन्ततनूजत्वक्तुषपांशुरजोमलैः ।
भस्मपङ्कतृणैर्वापि प्रच्छन्ना मलिना भवेत् ॥"
तासाञ्च शुद्धिमाह ।
"दहनं खननं भूमेरुपलेपनवापने ।
पर्ज्जन्यवर्षणञ्चैव शौचं पञ्चविधं स्मृतम् ॥"
वापनं मृदन्तरेण पूरणम् । अत्रामेध्यायाश्चतुष्कं पञ्चकं वा । दुष्टायाः द्विकं त्रिकं वा । मलिनायाः दहनादीनामेकधा शोधनमाह देवलः ।
"पञ्चधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति ।
द्विधा दुष्टा त्रिधा वापि शुध्यते मलिनैकधा ॥"
अन्यपञ्चप्रकारमाह मनुः ।
"सम्मार्ज्जनेनाञ्जनेन सेकेनोल्लेखनेन च ।
गवाञ्च परिवासेन भूमिः शुद्ध्यति पञ्चधा ॥"
सम्मार्ज्जनं तृणाद्यपनयनम् । अञ्जनं गोमयेनोपलेपनम् । सेको जलेन प्रक्षालनम् । उल्लेखनं तक्षणम् । परिवासो गवोपस्थापनम् अत्र सेकपरिवासयोर्मिलितमल्पापनविषयत्वम् अन्येषाममेध्यलिप्तविषयत्वम् । ब्रह्मपुराणे ।
"ग्रामाद्धनुःशतं त्यक्त्वा नगराच्च चतुर्गुणम् ।
भूमेः सर्व्वत्र शुद्धिः स्याद्यत्र लोको न विद्यते ॥"
धनुः चतुर्हस्तः । नगरं महाग्रामः । इति गोपालपञ्चाननकृतशुद्धिनिर्णयः ॥*॥ भूमौ वर्ण लेखनादिनिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तके लिखेत् ।